**BHARATI INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY RESEARCH & DEVELOPMENT (BIJMRD)**

**(Open Access Peer-Reviewed International Journal)**

DOI Link : https://doi.org/10.70798/Bijmrd/04060011

**Available Online: www.bijmrd.com | BIJMRD Volume: 4 | Issue: 06 | June 2026 | e-ISSN: 2584-1890**

# योजनगन्धा सत्यवती

**Sutrisha Chakraborty Nanda[1] & Dr. Renu Singha[2]**

1. Research Scholar, Department of Sanskrit, YBN University, Namkum, Jharkhand, India
2. Associate Professor, Department of Sanskrit, YBN University, Namkum, Jharkhand, India, Email: trinavasusnata@gmail.com

**अमूर्तम् (ABSTRACT):** *महाभारतं न केवलं कुरुक्षेत्रस्य युद्धस्य धर्माधमस्य संघातस्य पुरुषयोद्धानां वीरत्वस्य कथा, अपि च नारीशक्तिनां एकवृहतप्रकाशम्। अस्मिन् महाकावस्य सर्वत्र नारीचरित्रस्यप्रोयगमासीत् अपरिहार्यम्। सा नारीकुत्रापि आसीत् नियन्ता, सा नारी कुत्रापि आसीत् नियतेः वशीभूताः, कुत्रापि वा नियन्त्रनकारीनिरूपे सर्वाख्यानं प्रभावितमकरोत्*

*महाभारतस्य नारीचरित्राणि वैचित्रमयपूर्णं च न्यायनीतिगुणस्य प्रतीकस्वरूपम्। तासां जीवनम् जीवनस्य विविधा क्रिया प्रतिक्रिया सर्वोपरि तासां जीवनसंग्रामं महाकाव्यमिदं एकं पृथक् मर्यादां दत्तवान्। महाभारतस्य वहूनारीचरित्राणां यथा राजकुलस्यरजोगुणसमन्विता रमण्यः आसीत्, तथा आसीत् ऋषिपत्नी, यथासीत् कुलवधू, सम्राज्ञी तथासीत् वारवनिता गनिका। अपरपक्षे भाग्यवती परमसती अपि आसीत्। इदं सर्वजनस्वीकृतं यत् भारतवर्षस्य चिरं ऐतिह्यस्यधारकवाहकइयंस्त्रियः। ताः स्वकृतित्वे विराजमानाः चिरज्योर्तिमयीस्वरूपाः। ताः सावित्रि दमयन्ती, या सतीत्व इति गुणेन चिरं विख्याताः। तयोः द्वयोः मध्ये सावित्रिःमृत्युदेवधर्मराजं अभिभूतं कृतवती स्वकर्मनिष्ठायाम्। सत्यवती द्रौपदी गान्धारी उर्वशी देवयानी शर्मिष्ठा ताः सर्वाः स्वक्षेत्रेषु वलिष्ठारासीत्। ताः नार्यःयाःकदापि कन्या, भार्या जननी इतिविविधरूपैः भारतं समृद्धं चक्रिरे। ते कदापि नियन्ताः कदापि तेअन्यैः नियन्त्रिताःहिडिम्बा, उलूपी, तपती, सुभद्रा, सत्यभामा एतेषां नारीणां चरित्रालोके महाभारतम् महाकाव्यम् अत्युज्वलम्। इदं महाकायसमन्वितं महाभारतं भारतवर्षस्य शिक्षा संस्कृति अधात्मवोधं सर्वम् स्वरत्नसमृद्धपेटिकायां सयत्नैःपूर्णमकरोत्, भारतीयदर्शनस्य चतुर्वगस्य सर्वम् अस्मिन् महाकाव्य अस्ति, अतः सुष्टुक्तं व्यासपुत्रश्चशिष्यवैशम्पायनेन-*

*"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।*

*यदिहास्ति तदन्यत्र यन्नेहास्ति नतत् क्वचित्।। "*

*{महाभारतम् आदिपर्वन्, अध्यायः62 श्लोकः26}*

**कूटशब्दाः(KEYWORD):** *इन्द्रदेवप्रदत्तोपहारसमूहं, दपाठनिरतस्वभावसुन्दरः इन्द्रसग्धरा इति ख्याता, चारुहासिनी, योयनगन्धा, गन्धवती, राजमहिषीगिरीका।*

**आमुख (ITRODUCTION)**: सत्यवती महाभारतस्य स्वतन्त्रा स्वव्यक्तित्वेभास्वरा प्रभावशालिनी प्रतिभामयी एका स्वाधीना मञ्जुलानारी। तस्याः जन्मवृतान्तं अत्याश्चर्यम्। कापिनारीगर्भे तस्याःउतपत्ति न अभवत्। तस्याःजन्ममभवत् मतसगर्भे। आवाल्यात् सा धीवरगृहे प्रतिपालितमभवत्। तथापि तस्याः व्यक्तित्वं नारीसुलभचेतना तेजस्वीता इतिसर्वमुल्लेखमवश्यमेव प्रयोजनम्। धीवरगृहात् सा हस्तिनापुरस्य राजमाता अभवत्, अस्य उत्तोरणं तस्याः चरित्रस्य वलस्य परिचायकमिति अवश्यमेव स्वीकार्यम्।

सत्यवत्याः पिता चेदिराज्यस्य नृपासीत्, उपरिचरवसुः। सःपुरुवंशीयराजा आसीत्। सर्वदा धर्मपरायनः वेदपाठेनिरतस्वभावसुन्दरः मृगयाशीलनृपः सः देवश्रेष्ठइन्द्रदेवसखाआसीत्। नृपः अपि सः अस्त्रत्यागं कृत्वासुदीर्घकालयावत् तपोवनाभ्यन्तरे तपस्यायांनिरतः आसीत्।

"इन्द्रत्वमर्हो राजायं तपसेत्यनुचिन्त्य वै।

तं सान्त्वेन नृपं साक्षात् तपसःसंन्यवर्तयन्"।।4।।

{महर्षि वेदव्यासरचितः**महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः4}**

"तमाश्रमे न्यस्तशस्त्रंनिवसन्तं तपोनिधिम्।

देवाः शक्रपुरोगा वै राजानमुपतस्थिरे"।।3।।

**{महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः}**

एकदा देवाः तस्य सम्मुखे आर्विभूतं भूत्वा अवदत्-भवान् सर्वदा भूलोकं गत्वा धर्म रक्षां करोतु, फलस्वरूपे पुण्यलाभं कृत्वा चिरस्थायीव्रह्मलोकलाभं करोतु।

"लोकेधर्मं पालय त्वं नित्ययुक्तः समाहितः।

धर्मयुक्तस्ततो लोकान् पुण्यात् प्राप्नोसि शाश्वतान्"।।6।।

**{महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः6}**

अतः भवान्सदासत्यभाषनेनिरतजनसपन्न सर्वदा आनन्दितजनसम्पन्न--चेदिदेशे वसतु। तवकृते दिव्यरथ दानं करोमि। तस्मिन् दिव्यरथेन सर्वत्रगगने विचरनं करिष्यसि,

"देवोपभोग्यं दिव्यं त्वामाकाशो स्फाटिकं महत

आकाशगं त्वां महत्तं विमानमुपपत्स्यते"।।13।।

**{महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः13}**

वैजयन्तिः नामसम्पन्नमिति स्रग्धरा अपि दास्यामि, अस्य स्रग्धरायाः पङ्कजपुष्पं कदापि म्रियमान न भविष्यति इयं स्रग्धरा सदा समरे भवन्तं रक्षां करिष्यति। इयं स्रग्धरा जगति सदा इन्द्रस्रग्धरा इति ख्यातं भविष्यति। तदनन्तरम् इन्द्रदेवप्रदत्तोपहारसमूहं गृहित्वा अति हृष्टमनसि उपरिचरवसुः स्वराज्ये प्रतिवसति स्म। उपरिचरवसोः महावलवानमहाप्रभाववानाः वृहद्रथः, प्रत्यग्रहः, कुशाम्वः, मावेल्लःयदुः इति प्रञ्चपुत्राः आसन्।

"ददामि ते वैजयन्तीं मालामम्लानुंकजाम्।

धारयिष्यति संग्रामे या त्वांशस्त्रैरविक्षतम्"।। 14।।

{महर्षि वेदव्यासरचितः **महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः14}**

**उपरिचरवसोः** राज्यस्य निकटे शुक्तिमती नदी प्रवावितासीत्। कोलाहलनामपर्वतः कामावेगेन शुक्तिमती नदीं आवद्धमकरोत्। राजा एततवृत्तान्तं सर्वं श्रुत्ता अति क्षुव्ध सन्

कोलाहलनामपर्वतं पदाघातमकरोत्। पादप्रहारेण शुक्तिमती नद्याः कोलाहलनामपर्वतस्य एका कन्या च एकः पुत्रः जातवन्तौ। शुक्तिमती कन्यां च पुत्रं राजानं दत्तवती। कन्यायाः नामासीत् गिरिका, गिरिका अतिमञ्जुलासीत्।

गिरिं कोलाहलं नं तु पदा वसुरताडयत्।

निश्चकामततस्तेनप्रहारविवरेण सा।।36।।

{महर्षि वेदव्यासरचितः **महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः36}**

गिरिका राज्ञः राजमहिषीमभवत्। एकदा राजमहिषीगिरिका ऋतुस्नानं कृत्वापुत्रोतपादनस्य इच्छा राजानं ज्ञापयति स्म। तदनन्तरं नृपःवसुःमृगयार्थं वनमगच्छत्। नृपवसुः स्वपत्नीगिरिकां स्मरन् मृगयां चकार।

"ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः

तदहः पितरश्चैनमूचुर्जहि मृगानिति"।।40।।

{महर्षि वेदव्यासरचितः **महाभारतम् आदिपर्वन्, अध्यायः63 श्लोकः40}**

स चेतसि स्त्रीसम्भोगसुखं अनुभवं चकार। अतः तस्य वीर्यस्खलनमभवत् अरणाभ्यन्तरे।

वायुना प्रेर्यमाणस्तु धूम्राय मुदमन्वगात्।

तस्य रेतः प्रचस्कन्द चरतो गहने वने।।41।। आदि, 63, 40

तस्य शुक्र निष्फलं न भवतु इति विचिन्त्य नृपतिः तं शुक्रं वृक्षपत्रे धृत्वा श्येनपक्षिं निकषा गत्वा पक्षिं अवदत् -शुक्रमिदं मम पत्निगिरिकां निकषा नीत्वा गच्छ, राज्ञः आदेशेन वेगवानश्येनपक्षिः वायूवेगेन गतवान्

स्कन्नमात्रं च तद् रेतो वृक्षपत्रेणभूमिफः

प्रतिजग्राह मिथ्या मे न पतेद् रेत इत्युत।।50।।

महाभारतम् आदि त्रिषष्टितमोऽध्यायः

तदा अपर- श्येनपक्षिना सह संघातेन शुक्रमिदंयमुनायाःसलिले अपतत्। आद्रिका इति अप्सरा मुनेः शापेन मतसमभवत् सायमुनायाःसलिले अवसत्। सा मतसरूपिणी अप्सरा शुक्रमिदंउपरिचरवसोःतेजोविन्दुं वा आश्नत्। शुक्रप्रभावे सा गर्भवती अभवत्। अतःदशममासि सा मतस् धीवराणां जाले धृतासीत्। तस्य उदराम्भन्तरात् एकपुत्रः च एकाकन्या अजायेताम्। धीवराः अत्याश्चर्यवृत्तान्तं नृपतिं ऊचुः। नृपतिः तां कन्यां च तं पुत्रः जग्राह। राजा तां कन्यां धीवरस्य हस्ते समर्पनमकरोत्। सा कन्या सत्यवती इति ख्यातासीत्। सा रूपवतीगुनवती अलोकसामान्यासीत्। तस्याः वपुषःमतस इव दुर्गन्धं दू निर्गतमभवत्। अतः सा मतसगन्धा पराशरमुनेःवरेण योजनगन्धा इतिनाम्ना ख्यातासीत्। तस्याः पितुः दासराजस्य नाव सा चलयति स्म। अस्मिन् समये महर्षिःपराशरःतीर्थयात्रायां

वहिगर्तं भूत्वा सत्यवतीं अपश्यत् च तां प्रति आकृष्टमभवत्-

"दृष्ट्वैव स च तां धीमांश्चकमे चारुहासिनीम्।

दिव्यां तां वासवीं कन्यां रम्भोरुं मुनिपुङ्गवः"।।71।।

महाभारतम् आदि त्रिषष्टितमोऽध्यायः

सूर्यवंशस्य प्रख्यातपुरोहितःमहर्षिवशिष्टः। वशिष्टस्य पौत्रः च शक्ति पुत्रः आसीत् मुनिःपराशरः। विश्वामित्रेण सह वशिष्टस्य विवादं वहुदिवसंव्यप्य चलयति स्म। तेन कारनेन वशिष्टस्य पुत्रःशक्तिः ममार। सूर्यवंशस्य नृपतिः कल्माषपादस्य पौरहित्यपदं लाभकर्त्तुं विश्वामित्रं च वशिष्टं ऐच्छताम्। वशिष्टस्य पुत्रःशक्तिना सह अपि कल्माषपादस्य विवादमभवत्। राजा शक्तिं

सम्मानहानीं चकार। क्रोधवशात् शक्ति नृपं शशाप। नरपतिः कल्माषपादः विश्वामित्रस्य साहचार्येन शक्तिं जघान। शक्तिः यदा ममार, तदा शक्तिःकलत्रदृश्यन्ती आसीत् गर्भवती। वशिष्टमुनिः मनसन्तापेन प्रमत्तप्रायं भूत्वा गृहं त्याक्तवा ऐत्।

"स गत्वा विविधाञ्छैलान् देशान् वहुविधांस्तथा।

अदृश्यन्त्याख्यया वध्वाथाश्रमेऽनुसृतोऽभवत्"।।11।

महर्षिवेदव्यासप्रणीतः षट्सप्तत्यधिकशततमोऽध्यायः1श्लोकः 11

विविधदेशं भ्रमित्वा स्वगृहे यदा सः प्रत्यावत्तनं अकरोत् तदा सः अनुभवं चकार, एका कापि रमणी तस्य पश्चातानुसरणं करोति। सः ददर्श कापि विधवा नारी तस्य पश्चातानुसरणं करोति। वशिष्ठः चलन् अशृणोत् वेदोच्चारणस्य अनुदात्तोदात्तस्य ध्वनि। वशिष्टः नारीं प्रति अपृच्छत्, सा नारी का ?वेदस्य ध्वनि कुत्र आगच्छति ?इत्यादि। सा अवदत् सा नारी तस्य पुत्रवधूः शक्तिपत्निःअदृश्यन्ति। तस्याः गर्भे यः पुत्रः अस्ति सः द्वादसवर्षं व्यप्य तस्याः गर्भे अस्ति। सः पुत्रःवेदोच्चारणं करोति।

"अथ श्रुश्राव संगत्या वेदाध्ययननिःस्वनम्।

पृष्टतःपरिपूर्णार्थं षड्भिरङ्गैरलंकृतम्"।।

महाभारतम् आदि, षट्सप्तत्यधिकषततमोध्यायः[176]श्लोकः12

अदृश्यन्तिवचनात् इदृशं अश्रुतपूर्वं गिरं निश्यम्य वशिष्टः अति प्रसन्नं वभूव। वशिष्टः अशक्तिपुत्रः सः शक्तेः अन्यत् रूपं अन्यत् प्राणः अन्यत् जीवनं, अतः तस्य नाम पराशरः अभवत्,

"परासुः स यतस्तेन वसिष्टः स्थापितो मुनिः।

गभस्थेन ततो लोके पराशरइति स्मृतः।।3।।

महाभारतम् आदि, सप्तसप्तत्यधिकशततमोऽध्यायः"[177]श्लोकः3

इदृशप्रतिभावानः आसीत् महर्षिपराशरः।

पराशरःमुनिः सत्यवतीं पश्यतां अपृच्छत् यत् -नावं य तरयति स नाविकः कुत्र? मतसगन्धा उवाच- तस्याः पिताधीवरराजस्यदासराजस्य कोऽपि पुत्रः नास्ति सा एव एका कन्या तस्याःपितुः, अतः अहं नावं तरयामि। मुनिः दूरदृष्टिनिक्षपं कृत्वा तस्या-पूर्वजन्मनःसर्ववृतान्तं अजानत्। मुनिः तां प्रति अवदत्-वसुनन्दिनी श्रृणु, -वर्हिषद इति पितृलोकेआसीत् त्वं, तेषां मानसकन्ता आसीत् त्वं। तदा तव नामासीत् अच्छोदा।

त्वत् अलौलिकाच्छदं सरोवरं अजायत्। त्वं कदापि पितृगणं न अपश्यत्, त्वम् पितृगनस्य मनसः अजायथाःतु तान् स्वस्य पिता इति त्वं न अजानः। अतः त्वं पितृगणं परित्यज्य अपरजनं पिता इति स्वीकारं अकरोः। सःजनः वसुः नामासीत्। अपरजनं पिता इति ज्ञानमकरोः, तस्मात् पापात् योगभ्रष्टमभवत्। अतः त्वं उपरिचरःवसोः औरसे अद्रिका इति मतसगर्भे अजायथाः। अद्रिका अप्सरा व्राह्मणस्य अभिशापेन मतसरूपे अजायत्। अतः वसुकन्ये - तवमङ्गलं भवतु तव सकाशात् वंशरक्षकः कश्चित् प्रार्थयामि। त्वं मया सह सङ्गमं कुरु। मतसगन्धा अवदत् – नद्याः अपरतटे ऋषयः सन्ति ते वर्तमाने सति नौ सङ्गमं केन प्रकारेण सम्भवं भविष्यति।

इति श्रुत्वा तपोधनप्रधानऋषिपराशरःतपोप्रभावेन अति कुज्झटिका असृजत्। ततस्थानं घोरतमसायां पूर्णमभवत्। सत्यवती उवाच- भगवन् संसर्गेन मम कौमारित्व दूषितं भविशयति, तदा अहं गृहे प्रत्यवर्त्तनं केन प्रकारेण करोमि। एतत् श्रुत्वा महर्षिःसन्तुष्टः भूत्वा अवदत् – ममप्रियकार्यं कृत्वा अपि त्वं कुमारी स्थास्यसि। वरं प्रार्थय, मतसगन्धा आचचक्षे- मम वपुषः मतसगन्धं दूरं कृत्वा सौरभं प्रार्थयामि। तस्याःवपुषः तीव्रमतसगन्धं आसीत्। सत्यवत्याः प्रार्थनां श्रुत्वा महाप्रभावशाली

तपस्वीपराशरः मतसगन्धायाः अभिलषितवरं तस्यै प्रददौ। पराशरेन वरेण तस्याः वपुषः मतसगन्धं दूरीभूतमभवत्। तस्याःवपुषःअलौकिकसुगन्धं योजनं व्यपृतमभवत्तदा सा योजनगन्धा गन्धवती इति नाम्ना जगति प्रशिद्धमभवत्।

"एवमुक्ता वरं वव्रे गात्रसौगन्धमुत्तमम्।

स चास्यै भगवान् प्रादान्मनसःकाङ्क्षितं भूवि"।। 80।।

महाभारतम् आदि, त्रिषष्टिः अध्यायः[63]श्लोकः80

तदनन्तरं सा पराशरस्य संर्सगेन सद्य गर्भवतीअभवत्।

एकपुत्रं च सा सुषुवे। पराशरस्य पुत्रःयमुनाद्वीपे वालकरूपात् युवकशक्तिमानश्च अभवत्। सः मातुःअनुमत्यानुसारेण तपस्यासां मनोनिवेशमकरोत्। सः अवदत् – कार्य़ं उपस्थिते सति मां स्मरणं कुरु, ततक्षनादेव उपस्थितं भविष्यामि।

कालक्रमेण पराशरसत्यवत्याः पुत्रोऽयं महाभारतस्य रचयिता चत्वारवेदविभागकर्त्ता अष्टादशमहापुराणस्य रचयिता वेदव्यासः इति नाम्ना जगति ख्यतासीत्। तस्य जन्म द्वीपे अभवत् ततकारनात् तस्य नाम द्वैपायनःअभवत् च तस्य गात्रवर्णं कृष्णासीत् अतः तस्य नाम कृष्णद्वैपायणः

वेदव्यासःअभवत्। मुनिश्रेष्ठद्वैपायणः स्वपञ्चशिष्यं सुमन्तं, जैमिनिं, वैशम्पायणं स्वपुत्रंशुकदेवं ऋक्सामयर्जुथर्ववेदं अध्ययनं कारयति स्म। पश्चात् ते शिष्याः मूलसंहिता पृथक् पृथक् रूपेन प्रकाशं कुर्वन्ति।

सत्यवत्याः परिनयम्-महाराजप्रतिपस्य पुत्रः शान्तनुःसत्यवत्याः विवाहात् प्राक्मातागङ्गया सह विवाहमकरोत्। तयोःपुत्रेःदेवव्रतभीष्मस्य कथा वयं जानुमः। माता गङ्गा शान्तनुं निकषा स्वपुत्रः देवव्रतं निधाय स्वर्गं अगच्छत् इति वृतान्तं वयं जानुमः। शान्तनुःदेवव्रतं यौवराज्ये अभिषिक्तं कृत्वा, एकदा यमुनातीरसंलग्नं वनं गत्वा अनिर्वचनीयं सौरभं अनुभवं कृत्वा तस्य उतस् अण्वेषणं कुर्वन् सर्वदिशि दृष्टिनिक्षेपं कृत्वा अपश्यत् एकां अतीव मञ्जुलां नारीम्। शान्तनुः कन्यां पृष्ट्वा अजानत् तस्याः कन्यायाः पिता दासराजःच तस्याःनाम सत्यवती आसीत्। दर्शनमात्रेण तां कन्यां शान्तनुःविवाहं चिर्कीषति स्म। अतः सः दासराजं समीपे गत्वा स्वेच्छा ज्ञापनं चकार। दासराजःअजानत् शान्तनोः एकपुत्रःवर्तमानः अस्ति, अतःदासराजस्य़ एकमेव शर्तं य़दि सत्य़वत्य़ाःपुत्रःहस्तिनापुरस्य़ उत्तराधिकारी भविष्य़ति तर्हि सत्य़वत्य़ा सह शान्तनोःविवाहं भविष्य़ति इति। शान्तनुः दासराजवाक्यं निशम्य देवव्रतं स्मृत्वा सत्यवत्या सह परिणयविषये कापि कथा न उक्त्वा तत्र हस्तिनापुरेअचलत्। शान्तनुः सत्यवतीं इप्सति स्म, तु तां आप्तुं कोऽपि पन्थाः नावलोक्य सोऽतीव अधीरः अभवत्। एकदा देवव्रतः पितुः समीपं गत्वा पितुं पप्रच्छ, सर्वमयमङ्गलक्षेत्रे वर्तमानोऽस्ति भवान् तथापि किमर्थं सदा दुखिःतचेतसिअस्ति भवान्?शान्तनुः उवाच- पुत्रः त्वम् अस्मिन् वंशे एकःकेवलं पुत्रः त्वयि विपदि पतिते कोऽपि वंशरक्षक न भविष्यति। त्वम् मम अतीव प्रियपुत्रःइदं वचनं ध्रुवं सत्यं, अपि चपुत्रलाभाय कलत्रपरिग्रहं कर्त्तु अपि न इच्छामि, तव सदा शिवं भवतु इति काक्षामि केवलम्। देवव्रतः सुशिक्षितः वुद्धिमानःसःपितुः मनसःअव्यक्तं व्यक्तव्यं स्वयमेव ज्ञातुंअशक्नोत्, देवव्रतः तदा पितुःहिताकाध्खीवृद्धमन्त्रिनःसमीपं गत्वा पितुः व्यापारं अपृच्छत्, प्रत्युत्तरं अवदत् वृद्धमन्त्री, दासराजकन्यासत्यवतींतव पितामहाराजःशान्तनुः विवाहं चिकीर्षति, देवव्रतः सर्वं ज्ञात्वा वृद्धक्षत्रियजनैः सह मिलित्वा दासराजं समीपं गत्वा स्वयमेवपित्रे सत्यवत्याः पाणिप्रार्थनामकरोत्। देवव्रतःअवदत् सः स्वय़ं कदापि हस्तिनापुरस्य सिंहासनस्य नृपः न भविष्य़ति, कदापि सःविवाहमपि न करिष्य़ति

इति भीषनप्रतिज्ञां अकरोत्। सः उवाच दासराजन् मम प्रतिज्ञा श्रृणोतु, पुरा इदं वचनंकोऽपि वक्तुं न अशक्नोत्, भविष्यते अपि कोऽपि वक्तुं नशक्ष्यति। भवतः वचनानानुसारेण कार्य करोमि भवतः इप्सानुसारेण सत्यवत्याः गर्भस्य़ पुत्रः अस्माकं राजा भविष्यति इति।

देवव्रतः अपि अवदत् अदैव मम व्रह्मचर्यव्रतं भविष्यति, मम पुत्रः न भविष्यति तथापि मम अक्षयस्वर्गप्राप्तिं भविष्यति। अहं राज्याधिकारं अत्यजम् च व्रह्मचर्यव्रतावलम्वनं करोमि इयं मे दृट प्रतिज्ञा। देवव्रतस्य भीष्मस्य वा भीषनप्रतिज्ञां निशम्य दासराजःविवाहे सम्मतिं प्रदानं कृतवान्।

ततःभीष्मःसत्यवतीं उक्तवान्- मातःभवती रथं आरोहनं करोतु, आवां स्वगृहं गच्छावः, ततपश्चात् सत्यवत्या सह भीष्मः हस्तिनापुरं गतवान्। नृपाः भीष्मस्य प्रशस्तिं कृतवन्तःभीष्मस्य अस्मै कार्याय, शान्तनुः अति प्रसन्नं भीष्मं स्वेच्छामृत्युवरं अयच्छत् तदनन्तरं सत्यवत्याः च शान्तनोःपरिनयमभवत।, विवाहातनन्तरं शान्तनोः सत्यवत्याः च पुत्रद्वयस्य जन्ममभवत् चित्राङ्गदःविचित्रवीर्यःइति। सत्यवतीं निकषा चित्राङ्गदं विचित्रवीर्यं च निधाय शान्तनुःस्वर्गं जगाम। भीष्मः पितासम भूत्वा नावालकपुत्रद्वयम् पालितवान्, च हस्तिनापुरस्य रक्षणावेक्षणं कृतवान्। चित्राङ्गदःस्वल्पकालं राजत्वं कृत्वा युद्धे ममार। अतःकनिष्टभ्राता विचित्रवीर्यः राजा वभूव। भीष्मःविचित्रवीर्यस्य विवाहार्थं काशीराजस्य तिस्रकन्यां अम्वां, अम्विकाम्, अम्वालिकाम् तासां स्वयंवरसभायाःवलपूर्वकं नीत्वा हस्तिनापुरे आनीतवान्। भीष्मं विवाहं चिकीर्षुःअम्वा भीष्मेण प्रत्याख्याता आसीत्। अतःसा भीष्मं अभिशापं ददौ। यत् परजन्मनि भीष्मस्य मृत्युकारनं अम्वा भविष्यति इति। इदमुक्त्वा अग्नौ आत्मानं आत्माहूतिं अम्वा प्रददे। परजन्मनि अम्वा हि शिखण्डिरूपेण कुरुक्षेत्रे समरे भीष्मस्य मृत्युकारनं वभूव। भीष्मःअतीव गुणी वीरःपराक्रमीःमहान् योद्धा प्रजारञ्जकःभ्रातृप्रेमी आदर्शपुत्रःरूपे सदा प्रमानितः।

विचित्रवीर्येण सह अम्विकां च अम्वालिकां कन्याद्वयस्य विवाहमभवत्। तदनन्तरं निःसन्तान-विचित्रवीर्यःपरलोकगमनं चकारअतः हस्तिनापुरस्य सिंहासनस्य उत्तराधिकारी कः भविष्यति इति प्रश्नः?मृतपुत्रस्य प्रेतकार्यसमापनं कृत्वा पतिशोकाकुलापुत्रभार्याणां सुसात्वनावाक्यप्रयोगेन आसस्थं कृत्वा भीष्मं समीपं गत्वा अवदत् मम पुत्रः तव भ्राता आसीत् सोऽतीव वलशालीः आसीत्। सः तु वाल्यवयसि सन्तानहीनः द्यां जगाम। तवअमुष्य भ्रातुः पत्नीद्वयम् स्तः। इमे काशीराजस्य दुहितरौ सुलक्षणमञ्जुले पुत्रं प्रार्थनां कुर्व्वाते। अतः मम आदेशेन अस्माकं वंशरक्षितुं त्वंतयोः गर्भे पुत्रोतपादनं कुरु तत्कृत्वा धर्मानुसरणं कुरु। स्वयं वा राज्याभिषेकेन भरतवंशशासनं कुरु, धर्मानुसरेण कलत्रपरिग्रहणं कुरु, पितृपुरुषान् नरके पतितं मा कुरु। सत्यवत्याःसर्वं गिरं निशम्य भीष्मः वभाष- मातः भवती श्रेष्ठधर्मकथा वदति। मम तु प्रतिज्ञाविषये भवती अवगतमस्ति। अहं त्रिभुवनं परित्यागं कर्त्तुं शक्नामि देवानां राजत्वं परित्यागं कर्त्तुं शक्नामि, तु सत्यं। परित्यागं कर्त्तुं न शक्नामि। भवती कोपि व्राह्मणं आह्वाणं कृत्वा भार्याणां पुत्राधानं कुरु। भीष्मस्य वचनं श्रुत्वा सत्यवती पराशरऋषेः च सत्यवत्याः मिलने व्यासदेवस्यजन्ममभवत् इति पूर्वकथां सत्यवती श्रावयति स्म भीष्मंम्, अपि चविचित्रवीर्यस्य कलत्राणं गर्भाधानकार्यं साधनाय भीष्मस्य अनुमत्यानुसारेण पुत्रवेदव्यासं आह्वाणं कर्त्तु ऐच्छत्सत्यवती। भीष्मस्य अनुमत्यानुसारेण

तदा सत्यवत्या आदेसेन, सत्यवत्या च पराशरस्य पुत्रःमहाभारतस्य रचनाकारस्य महर्षिवेदव्यासस्य औरसे अम्विकायाः गर्भे धृतराष्ट्रस्य जन्ममभवत्, च अम्वालिकायाःगर्भे पाण्डोः जन्ममभवत् च दासीगर्भे विदुरस्य जन्ममभवत्। धृतराष्टः जन्मान्धः अतो सः हस्तिनापुरस्य राजसिंहासनस्य उत्तराधिकारीरूपे आत्मप्रतिष्ठां कर्त्तुं न शक्नोति स्म। पाण्डु हि राजसिंहासनस्य सम्राट् वभूव। धृतराष्टेण सह गान्धारराजसुवलस्यकन्या गान्धार्याः विवाहमभवत्। पाण्डुणा सह कुन्तिभोजस्य पालिताकन्या कुन्त्याः च मद्रराजकन्या माद्र्याःपरिनयमभवत्। धृतराष्टस्य शतपुत्राःच एकाकन्या आसीत्। पाण्डुःऋषेःअभिशापेन सन्तानोपत्तौ न सक्षमो वभूव। दुर्वासामुनेः आशीसेन समृद्धा कुन्ती देवं आह्वाहनं कर्त्तुं शक्नोति स्म। अतो कुन्ती देवताआह्वानेन स्वस्य पुत्रत्रयस्य च माद्र्या पुत्रद्वयस्य माता अभवत्।

उपसंहारम् -सत्यवती नृपदुहिता, धीवरस्य गृहे लालिता पालिता च। केवलं वपुगन्धरहित धीवरगृहस्य अन्यत् किमपि संस्कारं सा न अगृह्णात्, दासराजस्य अवर्तमाने सा नावं त्वरयति स्म, तु तेन संस्कारेन सह युक्तं न अभवत्। पराशरमुनेः परिचयं प्राप्य सा मुनेः सकाशं गात्रगन्धं दुरीकत्तुं ऐच्छत्। तस्याः कौमारीत्वं न भविष्यति अनेन कारनेन सा पूर्वे, पराशरेण सह मिलने सम्मतं न अभवत्, तु पराशरेण सह मिलनात् परं अपि तस्याः कौमारीत्वं भवष्यति पराशरस्य अनेन आशीर्वाक्येन आश्वस्थं भूत्वा सा पराशरेण सह मिलने सम्मतिं प्रदानमकरोत्।, भीष्मस्य शिक्षा, कर्त्तवेनिष्ठा, वीरत्यं, भीष्मस्य सुनिष्णातनेतृत्वं सर्वगुणं प्रति सत्यवती अवगतमासीत्, तु सत्यवत्याःकारने भीष्मस्य गुणावली प्रष्फुटीतं न अभवत् इति विषये तस्याः आत्मग्लानी आसीत्। सत्यवती महाभारतमिति महाकावस्य एका अत्युकृष्टा अति व्याक्तित्वमयीनारी चरित्रा, या धीवरस्य गृहे पालितातथापि तस्याःधीशक्त्या असाधारणपत्युपन्नतीत्वेन सा हस्तिनापुरस्य राजाङ्गनमालोकयति स्म स्वगुणेन राजमाता च अभवत् सत्यवती राजकन्या, धीवरस्य गृहे पालिता गात्रगन्धं विना सा धीवरस्य गृहस्य किमपि न अगृह्णत्। दासराजस्य अवर्तमाने सा नावं तरयति सत्यम् किन्तु तत् तस्य स्वभावस्य अङ्गं न भवति, पराशरेण सह मिलने सा प्रारम्भे सम्मतिं प्रदानं न कृतवती। यतःतस्याः कौमारीत्व दूषितरूपभावेन भयभीतासीत्। ततपरं यदा सा अजानतपराशरस्य आशीषेन सा कुमारी स्थास्यसि तदा सा पराशरेण सह मिलने सम्मतिं प्रदानं कृतवती। भीष्मं प्रति अनाचारेन आत्मग्लानी तस्याः आसीत्। भीष्मं प्रति तस्याः

सदाचारासीत् चिरम्। राजकन्यारूपे जननीरूपे हस्तिनापुरस्य राजमातारूपे सदा सा कत्तर्वपरायना सदा स्वकर्त्तवे अचला एका नारी।

**References –**


- Basu Rajsekher[2001]Mahabharata, M.C Sarker and P.V.T
- Mahabharaternaree- Direshchandra Bhattacharya
- Mhabharata- vedavysa[2021]महाभारतम् आदिपर्वन्, अध्याय:63 श्लोकः4}Gita press
- Mhabharata- vysaveda[2021]महाभारतम् आदिपर्वन्, अध्याय:63 श्लोकः3} Gita press
- Pattanaik Devdutt Jaya- Illustrated Retelling of thaMhabharat
- महर्षिवेदव्यासप्रणीतःषट्सप्तत्यधिकशततमोSध्यायः[176]श्लोकः 11 Gita press
- महाभारतम् आदि, षट्सप्तत्यधिकषततमोध्यायः[176] श्लोकः12



**Citation:** **Chakraborty Nanda. S. & Singha. R.,** (2026) "योजनगन्धा सत्यवती", *Bharati International Journal of Multidisciplinary Research & Development (BIJMRD)*, Vol-4, Issue-06, June-2026.